त्रिनेत्रा, स्त्री, (त्रीणि नेत्राणीव शरीरे यस्याः ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥ नेत्रत्रय-युक्ता च ॥

त्रिपताकं, क्ली, (तिस्रः पताका इव रेखा यत्र ।) रेखात्रयाङ्कितभालम् । इति हारावली ।११४॥ (तिस्रः पताका इव अङ्गुलयो यत्र । त्रिपताक-लक्षणान्विते हस्ते, पुं । यथा, साहित्यदर्पणे । ६ । १५४ ।

"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते तज्जनान्ति-कम् ॥"

"यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरत ऊर्द्ध्वं सर्व्वाङ्गुलिनामितानामिकं त्रिपताकलक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तत्जनान्तिकम् ॥")

त्रिपत्रं, क्ली, (त्रीणि त्रीणि पत्राणि यत्र ।) दल-त्रययुक्तबिल्वपत्रम् । यथा,—

विष्णुरुवाच ।

"दक्षपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम् । अग्रं दक्षिणमत्रञ्च त्रिपत्रदलमिष्यते ॥"

इति वृहद्धर्म्मपुराणे बिल्वपत्रमाहात्म्ये ११ अध्यायः ॥

त्रिपत्रः, पुं, (त्रीणि त्रीणि पत्राणि यस्य ।) बिल्वः । इति राजनिर्घण्टः ॥ पत्रत्रये, स्त्री ॥

त्रिपत्रकः, पुं, (त्रीणि त्रीणि पत्राणि यस्य ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥ (त्रयाणां पत्राणां समाहारः । ततः कन् । तुलस्यादि पत्रत्रये, क्ली । यथा, देवीपुराणे ।

"तुलसीकुन्दमालूरपलाशाङ्कुशपत्रकम् ॥")

त्रिपथं, क्ली, (त्रयाणां पथां समाहारः । "ऋक्-पूरिति ।" ५ । ४ । ७४ । इत्यः ।) त्रिमार्गम् । तेमाथा पथ इति भाषा । तत्पर्य्यायः । त्रिकम् २ । इति हेमचन्द्रः । ४ । ५२ ॥

"शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे । बिल्वमात्रौदुमस्तान्त्रिपथे दा अजेन्निशि । स भवेत् सर्व्वसिद्धीशः सर्व्ववेदविदां वरः ॥"

इति गुप्तसाधनतन्त्रम् ॥

(तिसृणां नाडीनां पन्थाः । इति विग्रहे कपाल-कुहरे, पुं । यथा, हठयोगप्रदीपिकायाम् ।३।३७।

"कर्णौ पराङ्मुखौ कृत्वा त्रिपथे परियोजयेत् । सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते ॥")

त्रिपथगा, स्त्री, (त्रिपथे स्वर्गमर्त्त्यपातालमार्गे गच्छतीति । गम + डः ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥ (अस्या निरुक्तिरुक्ता यथा, रामा-यणे । १ । ४३ । ६ ।

"गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च । त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता ॥")

त्रिपदा, स्त्री, (त्रयः पादा मूलानि यस्याः । टापि पादस्य पद्भावः ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"गोधापदी तु सुवहा त्रिपदा हंसपद्यपि ॥"

इति वैद्यकरत्नमालायाम् ।

(त्रयः पादाश्चरणानि यस्याः । त्रिपादयुक्ते, त्रि । यथा, मनुः । २ । ८१ ।

"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः । त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")

त्रिपदिका, स्त्री, (त्रयः पादा अस्याः इति त्रिपदी ततः संज्ञायां कन् ततष्टाप् ।) अर्घ्यार्थधातु-निर्म्मितत्रिपादयुक्तशङ्खाधारः । इति तन्त्र-सारः ॥ ("तत्र त्रिपदिकामारोप्य तदुपरि शङ्खं स्थापयेत् ।" इति पूजापद्धतिः ॥)

त्रिपदी, स्त्री, (त्रयः पादा अस्याः । ङीपि पद्भावः ।) गोधापदी । इति रत्नमाला ॥ हस्ति-गात्रबन्धः । इति हेमचन्द्रः ।४।२८६ ॥ (हस्ति-पादबन्धनम् । इति यादवः ॥ यथा, रघुः । ४ । ४८ ।

"गाम्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥")

त्रिपादयुक्ता । पदत्रयम् । इति व्याकरणम् ॥ भाषाकवितायाश्छन्दोविशेषः । यथा,—

"पञ्चकटिकान्ता यदि यमकान्ता द्वादश परिवृतमात्रा । किन्नरगीतिः वदति निवीतिः स्याद्धंसमाचरगात्रा ॥"

स्वपादान्त उदाहृतः ।

"येषा सङ्गीतके नित्यं निवीतिः किन्नराख्यिका । सैव स्यात् प्राकृते गाने त्रिपदीति परिश्रुता ॥"

इति काव्योदयः ॥

(त्रिषु मार्गेषु पादो गमनं यस्याः । गङ्गा । यथा, काशीखण्डे । २९ । ७१ ।

"त्रैलोक्यलक्ष्मीस्त्रिपदी तथ्या तिमिरचन्द्रिका ॥")

त्रिपर्णः, पुं, (त्रीणि त्रीणि पर्णानि यस्य ।) पलाशः । इति राजनिर्घण्टः ॥

त्रिपर्णिका, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः । संज्ञायां कन् । टापि अत इत्वञ्च ।) कन्द-विशेषः । तत्पर्य्यायः । श्वेतपत्रा २ छिन्न-ग्रन्थिनिका ३ कन्दालुः ४ कन्दबहुला ५ अम्ल-वल्ली ६ विनाशहा ७ त्रिपर्णी ८ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । श्वासकासविष-व्रणविनाशित्वम् । पित्तप्रकोपशमनत्वञ्च । इति राजनिर्घण्टः ॥

त्रिपर्णी, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः । गौरादित्वात् ङीष् ।) शालपर्णी । इति भाव-प्रकाशः ॥ (अस्या गुणा यथा,—

"यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका । शाकञ्च कूष्माण्डञ्च प्रायो विष्टभ्य जीर्य्यति । मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम् ॥"

इति चरके सूत्रस्थाने २७ अध्याये ॥)

वनकार्पासी । पृश्निपर्णीभेदः । इति रत्नमाला ॥

त्रिपात्, [द्] पुं, (त्रयः पादा अस्य । "संख्या सुपूर्व्वस्य ।" ५ । ४ । १४० । इति पादस्यान्त-लोपः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (वेदादि-मते संसाररहितो ब्रह्मस्वरूपः पुरुषः । यथा, ऋग्वेदे । १० । ९० । ४ ।

"त्रिपादूर्द्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ॥"

पुराणादिमते वामनावतारे त्रिपात् भूत्वा बलिसकाशात् सर्व्वं राज्यादिकं गृहीतवानित्य-तोऽस्य तथात्वम् । तथाच भागवते ।८।२०।३४।

"क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः । पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि । उरुक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो महर्जनाभ्यां तपसः परं गतः ॥")

ज्वरः । यथा,—

"विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥"

इति श्रीभागवतम् ॥

त्रिपादिका, स्त्री, (त्रयः पादाः मूलानि यस्याः । कप् ततष्टापि अत इत्वम् ।) हंसपदीलता । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"हंसपादी हंसपदी कीटमाता त्रिपादिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।)

त्रिपिष्टपं, क्ली, (त्रिदशानां देवानां पिष्टपं वास-स्थानम् । पृषोदरादित्वात् दशशब्दस्य लोपः । यद्वा, मर्त्त्यपातालापेक्षया तृतीयं पिष्टपम् भुवनम् । इत्तौ त्रिशब्दस्य त्रिभागवत् पूरणा-र्थता ।) स्वर्गः । इत्यमरः । १ । १ । ६ ॥ (यथा, महाभारते । १ । २०८ । ३५ ।

"तत् त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत ॥")

आकाशम् । इति शब्दरत्नावली ॥

त्रिपिष्टपसत्, [द्] पुं, (त्रिपिष्टपे स्वर्गे सीदतीति । सद + क्विप् ।) देवता । इति हलायुधः ॥

त्रिपुटः, पुं, (त्रीणि पुटानि यस्य ।) सतीलकः । तीरम् । इति मेदिनी । टे, ४५ । हस्तभेदः । तालकः । इति शब्दरत्नावली ॥ गोक्षुरश्च ॥ इति रत्नमाला ॥ (कलायविशेषः । खेसारी इति भाषा ॥ अस्य पर्य्याया गुणाश्च यथा,—

"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा अथ । त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् । कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा । किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"अन्यानि चैव शस्तानि कौलत्थान्युषितानि च । मसूरास्त्रिपुटा वल्लाः कलायाद्याश्च वर्णिताः ॥"

इति हारीते प्रथमे स्थाने नवमेऽध्याये ॥)

त्रिपुटा, स्त्री, (त्रीणि पुटानि दलरूपाणि यस्याः ।) मल्लिका । सूक्ष्मैला । त्रिवृत् । इति मेदिनी । टे, ४५ ॥ कर्णस्फोटा । स्थूलैला । रक्तत्रिवृत् । इति राजनिर्घण्टः ॥ देवीविशेषः । यथा,—

"ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः । त्रिपुटाख्या द्विरुक्तैस्तैर्वीजैरङ्गानि षट् क्रमात् ॥"

अस्या रूपं यथा,—

"पारिजातवने रम्ये मण्डपे मणिकुट्टिमे । रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते ॥ अधस्तात् कल्पवृक्षस्य निषण्णां देवतां स्मरेत् ।